श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ आकाशनगरीशप्रपत्तिः ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font. Our sincere thanks to **Sri. L. Ramarajan** of California for providing the printed text and **Dr. Desikan Parthasarathy** of Bangalore for proof-reading this document.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ आकाशनगरीशप्रपत्तिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

संकल्पकल्पलतिकामवधिं क्षमायाः
आकाशपुर्यधिपतेर्महिषीं दयार्द्राम्।
विश्वस्य मातरमकिञ्चनकामधेनुं
विश्वंभरामशरणः शरणं प्रपद्ये॥ १ ॥

श्रीमन्मृकण्डुजमहर्षितपोविपाकौ
भूम्याऽभिनन्दितमहाम्रदिमस्वभावौ।
आविष्टदुष्टशकटप्रकटोग्रभावौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ २ ॥

शापोपसृष्टयमलार्जुनदृष्टलीलौ
पाषाणनिर्मिततपोधनधर्मदारौ।
दिव्यान्तरिक्षनगरीकृतसन्निधानौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ ३ ॥

स्वान्ते सतां श्रुतिषु यौ तमसश्च पारे
अहोरात्रपुष्करिणिकारमणीयतीरे॥
देव्या भुवोऽङ्कभुवि सन्निहितौ सदा तौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ ४ ॥

दुर्दान्तकालियफणाकृतदिव्यनृत्तौ
वेधःकमण्डलुजलैरभिषिक्तपूर्वौ।
गङ्गाङ्गसङ्गपरिपूतभवस्तुतौ तौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ ५ ॥

www.prapatti.com

त्रैविक्रमक्रमवशीकृतसप्तलोकौ
लोकेश्वरैरपि सदा कलितप्रणामौ।
नामावशेषितवदान्यबलिप्रभावौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ ६ ॥

सद्भक्तपाण्डवकृते कृतदूतकृत्यौ
बृन्दावनान्तरविहाररसप्रसक्तौ।
सर्वोपकारकरणाय कृतावतारौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ ७ ॥

श्रीमच्छठारिकलिवैरिमहत्सरोभिः
नाथागमान्तगुरुमुख्यगुरूत्तमैश्च।
संवाञ्छितातिशयितप्रियमङ्गलौ तौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ ८ ॥

भक्तप्रपन्नजनरक्षणबद्धदीक्षौ
नानाविधाघटितसङ्घटने समर्थौ।
अर्च्यौ प्रशस्ततुळसीकुसुमैरनन्यैः
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ ९ ॥

सङ्क्रन्दनादिसुरबृन्दसमर्प्यमाण-
मन्दारमाल्यविगलन्मकरन्दसान्द्रौ।
सारथ्यसूचितसदीड्यसुशीलभावौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ १० ॥

विश्वातिशायिसुषमासुकुमारभावौ
वज्रध्वजाङ्कुशरथाङ्गमुखाङ्कदृश्यौ॥
दिव्याङ्गुलीनखमयूखविलिप्तपीठौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ ११ ॥

संपद्दारिद्र्यभावादसुखसुखकृतेः पत्तनग्रामभावात्
पुण्यापुण्यादिभावात् कपटऋजुतया सर्वलोकादिभावात्।

दिव्यादिव्याङ्गवत्त्वात् सुरदितिजगणस्निग्धशत्रुत्वकीर्त्या
छायाऽच्छायादिभावादघटितघटनं प्राह कृष्णं शठारिः॥ १२ ॥

॥ इति आकाशनगरीशप्रपत्तिः समाप्ता ॥

www.prapatti.com